Department :- Ayurved Samhita & Siddhant

# NYĀYA IN ĀYURVEDA

# प्रयोजनम्

**Why Study Nyāya?**

- **Concise Form of Āyurveda Saṁhitā**
- **Complexity**
- **Need of Tools for simplification**
- **Various tools- Tantrayukti, Vādamārga, Arthāśraya, Tācchilya, Kalpanā, NYĀYA etc**

# NYĀYA

- Nyāyas are worldly sayings.
- Incorporate stories or current legends among people.
- Collected by observing human behaviour patterns.
- Used to visualise a situation with minimal words.
- Mere translation may not give an exact idea.

# निरुक्तिः

न्यायः → नि + इण् + घञ्

उपसर्गः – निश्चयेन

धातुः – गतिः

करणार्थे प्रत्ययः

- निश्चयेन अर्थज्ञानं प्रति गमनस्य करणं–साधनम्।
- नियमेन ईयते इति न्यायः।
- निश्चितम् ईयते निर्णीयते अनेन इति न्यायः।
- नीयन्ते प्राप्यन्ते विविक्षितार्था येनेति।

# न्यायः (Maxim)

## व्याख्या

युक्तिमूलकदृष्टान्तविशेषो न्यायः।

-शब्दकल्पद्रुम

**An illustrative example based on logic is called as Nyāya (maxim).**

# न्यायः (Maxim)

General Classification

१. लौकिक

२. शास्त्रीय

# न्यायः (Maxim)

Classification Based On Utility

**Justification for the consecution of subject matter-**

- सूची–कटाह न्याय
- काकदन्तपरीक्षा न्याय
- नापृष्टाः गुरवो वदन्ति न्याय

**Justification for the context or the Mūlasūtra-**

- छत्रिणो गच्छन्ति न्याय
- शृङ्गग्राहिक न्याय
- गोबलीवर्द न्याय

# न्यायः (Maxims)

For the better understanding of subject matter

| Philosophical Aspect- | Physiological Aspect- | Pathological Aspect- |
|---|---|---|
| कदम्ब-मुकुल न्याय | क्षीरदधिन्याय | नवघटपङ्कन्याय |
| विचितरङ्ग न्याय | केदारिकुल्या न्याय | |
| शिलापुत्रक न्याय | खलेकपोतन्याय | |

# छत्रिणो गच्छन्ति न्यायः



# छत्रिणो गच्छन्ति न्यायः

धार्याण्यास्येन वैशद्यरुचिसौगन्ध्यमिच्छता।
जातीकटुकपूगानां लवङ्गस्य फलानि च ॥
कक्कोलस्य फलं पत्रं ताम्बूलस्य शुभं तथा।
तथा कर्पूरनिर्यासः सूक्ष्मैलायाः फलानि च॥

–च.सू. ५.७६–७७

यदि अपि लवङ्गस्य वृन्तम् अभिप्रेतं तथा अपि बहूनां फलस्य ग्राह्यत्वात् छत्रिणः गच्छन्ति इति न्यायेन सामान्येय फलम् इति उक्तम्।

–चक्रपाणि

# छत्रिणो गच्छन्ति न्यायः

ज्वरादीनां विकाराणामष्टानां साध्यता न च।
पृथगेकैकशश्चोक्ता हेतुलिङ्गोपशान्तयः॥

– च.नि. ८.४३

यदि अपि ज्वरनिदाने ज्वरस्य असाध्यता न उक्ता तथापि अष्टानाम् इति पदं छत्रिणो गच्छन्ति इति न्यायेन बोद्धव्यम्।

– चक्रपाणि

# छत्रिणो गच्छन्ति न्यायः

सप्तभिर्देहधातारो धातवो द्विविधं पुनः।
यथास्वमग्निभिः पाकं यान्ति किट्टप्रसादवत्॥


– च.चि. १५.१५

शुक्रस्य यदि अपि किट्टवान् पाकः न भवति, तथा अपि बहूनां किट्टवत्त्वाद् द्विविधम् इति निर्देशः छत्रिणो गच्छन्ति इति न्यायात् ज्ञेयः।

# शिलापुत्रक न्यायः



# शिलापुत्रक न्यायः




सर्वभूतानां कारणमकारणं सत्त्वरजस्तमोलक्षणमष्टरूपमखिलस्य जगतः सम्भवहेतुरव्यक्तं नाम।

तदेकं बहूनां क्षेत्रज्ञानामधिष्ठानं समुद्र इवौदकानां भावानाम्॥

– सु.शा. १.३

शिलापुत्रकन्यायेन रूपत्वं रुपित्वं चाव्यक्तस्य। – डल्हण

# शिलापुत्रक न्यायः



अव्यक्त (मूल प्रकृति)
(रुपी)
महत्
अहंकार
सात्विक अहंकार
राजस अहंकार
तामस अहंकार
पञ्चतन्मात्रा
(रुप)

# शृङ्गग्राहिक न्यायः



# शृङ्गग्राहिक न्यायः

Positive perspective

इति पञ्चकषायशतान्यभिसमस्य पञ्चाशन्महाकषाया महतां च कषायाणां लक्षणोदाहरणार्थं व्याख्याता भवन्ति॥

–च.सू. ४.१९

सम्प्रत्येतान्येव जीवकादीन्युक्तानि प्रत्येकशो द्रव्यगणनया पञ्चकषायशतानि स्युः, दशकगणनया च पञ्चाशन्महाकषायाः शृङ्गग्राहिकयोक्ता भवन्तीति दर्शयन्नुपसंहरति- इतीत्यादि।

–चक्रपाणि

# शृङ्गग्राहिक न्यायः

Positive perspective

त्रिविधं तु खलून्मादकराणां भूतानामुन्मादने प्रयोजनं भवति;.........तत्र हिंसार्थिनोन्माद्यमानोऽग्निं प्रविशति,अप्सु निमज्जति....।।

–च.नि. ७.१५

हिंसार्थिगृहीतस्य असाध्यत्वेन तद्विज्ञानार्थं सामान्योक्तान्यपि लक्षणानि शृङ्गग्राहिकया ब्रूते।

–चक्रपाणि

# शृङ्गग्राहिक न्यायः

Positive perspective

यतस्तु कार्त्स्न्येनाविनश्यन् विकृतिमापद्यते, तदनुव्याख्यास्यामः- यदा स्त्रिया ........ तदा तस्य गर्भस्य मातृजानामवयवानामन्यतमोऽवयवो विकृतिमापद्यत एकोऽथवाऽनेके, यस्य यस्य ह्यवयवस्य बीजे बीजभागे वा दोषाः प्रकोपमापद्यन्ते, तं तमवयवं विकृतिराविशति । यदा ह्यस्याः शोणिते गर्भाशयबीजभागः प्रदोषमापद्यते, तदा वन्ध्यां जनयति; यदा पुनरस्याः शोणिते गर्भाशयबीजभागावयवः प्रदोषमापद्यते, तदा पूतिप्रजां जनयति; यदा त्वस्याः शोणिते गर्भाशयबीजभागावयवः स्त्रीकराणां च शरीरबीजभागानामेकदेशः प्रदोषमापद्यते, तदा स्त्र्याकृतिभूयिष्ठामस्त्रियं वार्तां नाम जनयति, तां स्त्रीव्यापदमाचक्षते ॥

–च.शा. ४.३०

एतां विकृतिमेव शृङ्गग्राहिकतया वक्तुमाह- यदेत्यादि।

–चक्रपाणि

# शृङ्गग्राहिक न्यायः

Negative perspective


नाल्पं हन्त्यौषधं व्याधिं यथाऽऽपोऽल्पा महानलम् ।
दोषवच्चातिमात्रं स्यात्सस्यस्यात्युदकं यथा ॥
सम्प्रधार्य बलं तस्मादामयस्यौषधस्य च ।
नैवातिबहु नात्यल्पं भैषज्यमवचारयेत् ॥

–च.चि. ३०.३१४

प्रमाणविशेषावेक्षं योगं दर्शयन्नाह- नाल्पमित्यादि। यद्यपि चेह भेषजस्य प्रमाणं शृङ्गग्राहिकया नोक्तं, तथाऽपीह दोषप्रमाणानुरूपो हि भैषज्यप्रमाणविकल्पो बलप्रमाणविशेषापेक्षो भवति (वि.अ.८) इत्यादिनोक्तं मध्यभेषजप्रमाणं ज्ञेयम्॥

–चक्रपाणि

# सूची-कटाह न्यायः



# सूची-कटाह न्यायः



तत्र बुद्धिमता मानसव्याधिपरीतेनापि सता बुद्ध्या हिताहितमवेक्ष्यावेक्ष्य धर्मार्थकामानामहितानामनुपसेवने हितानां चोपसेवने प्रयतितव्यं, न ह्यन्तरेण लोके त्रयमेतन्मानसं किञ्चिन्निष्पद्यते सुखं वा दुःखं वा; तस्मादेतच्चानुष्ठेयं- तद्विद्यानां चोपसेवने प्रयतितव्यम्, आत्मदेशकुलकालबलशक्तिज्ञाने यथावच्चेति ॥

-च.सू. ११.४६

सम्प्रति मानसव्याधिचिकित्साया अल्पवक्तव्यत्वेनेहैव तच्चिकित्सामाह- तत्रेत्यादि।

–चक्रपाणि

# काकदन्त परीक्षा न्यायः



# काकदन्त परीक्षा न्यायः

अथातो दीर्घञ्जीवितीयमध्यायं व्याख्यास्यामः ॥१॥


–च.सू.१



यतो निरभिधेये कचटतपादौ साभिधेये वा
निष्प्रयोजने काकदन्तपरीक्षादौ प्रेक्षावतां प्रवृत्तिर्नोपलभ्यते, तेनादावभिधेयप्रयोजने अभिधातव्ये।

–चक्र.

# काकदन्त परीक्षा न्यायः



दृश्यन्ते भगवन् केचिदात्मवन्तोऽपि रोगिणः।
द्रव्योपस्थातृसम्पन्ना वृद्धवैद्यमतानुगाः॥६०॥
क्षीयमाणामयप्राणा विपरीतास्तथाऽपरे।।
हिताहितविभागस्य फलं तस्मादनिश्चितम्॥६१॥ –अ.हृ.उ.४०

हिताहितविभागस्य तन्त्रोक्तं फलमनिश्चितं-अनैकान्तिकम्। अनिश्चितफलत्वाच्च कारणात् शास्त्रं-आयुर्वेदाख्यं, किं शास्ति ? न-किञ्चिच्छिक्षयतीति। अतश्चैतदारम्भो निष्फलः काकदन्तपरीक्षाशास्त्रवत्।इति विकल्पयतः शिष्यगणस्य-जातूकर्ण्यभेडादेः, भगवान् पुनर्वसुस्तत्त्वं-परमार्थं, कार्त्स्न्येन-सामस्त्येन, जगाद।

–सर्वाङ्गसुन्दरा

# नापृष्टाः गुरवो वदन्ति



# नापृष्टाः गुरवो वदन्ति

तपसा यशसा धृत्या धिया च परयाऽन्वितः ।

आत्रेयः कासशान्त्यर्थं प्राह सिद्धं चिकित्सितम् ॥

-च.चि. १८.३

अत्र चात्रेयस्याभिधानादेव शिष्यप्रश्नोऽनुमीयते, नापृष्टा गुरवो वदन्तीति न्यायात्।

–चक्रपाणि


# नापृष्टाः गुरवो वदन्ति

प्रागुत्पत्तिं गुणान् योनिं वेगान् लिङ्गान्युपक्रमान् ।
विषस्य ब्रुवतः सम्यगग्निवेश निबोध मे ॥


–च.चि. २३.३

अत्र नापृष्टा गुरवो वदन्तीति न्यायाच्छिष्यप्रश्न उन्नेयः।
–चक्रपाणि

# गोबलीवर्द न्याय:



# गोबलीवर्द न्यायः



सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामतिः ।

-च.सू.१.२५-२६

अत्र पारशब्देन गोबलीवर्दन्यायेन आदिः उच्यते; पारशब्दो ह्युभयोरपि नदीकूलयोः विवक्षावशाद्वर्तते;

–चक्रपाणि

# गोबलीवर्द न्यायः

द्वे अधः सप्त शिरसि खानि स्वेदमुखानि च ।

मलायनानि बाध्यन्ते दुष्टैर्मात्राधिकैर्मलैः ॥


-च.सू. ७.४२

दुष्टैरिति गोबलीवर्दन्यायेन क्षीणैः, मात्राधिकैरिति वृद्धैः; येनोत्तरत्र

क्षयवृद्ध्योरपि लक्षणं वदति।

–चक्रपाणि

# गोबलीवर्द न्यायः



अच्छे संशोधने चैव स्नेहे का वृत्तिरिष्यते ॥

–च.सू.१३.७

अच्छे इति संशोधनपृथङ्निर्देशाद्गोबलीवर्दन्यायेन संशमन इति भवति।

–चक्रपाणि

# शतपत्रभेद न्यायः



# शतपत्रभेद न्यायः

नह्येकं ह्येककालमनेकेषु प्रवर्तते तस्मान्नैककाला सर्वेन्द्रियप्रवृत्तिः ॥

–च.सू. ८.५

युगपत् पञ्चज्ञानान्युत्पद्यन्त इति तु ज्ञानं युगपदुत्पलपत्रशतव्यक्तिभेदज्ञानवद्भ्रान्तम्।

–चक्रपाणि

# घुणाक्षर न्यायः



# घुणाक्षर न्याय

तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।

स चैव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत् ॥

-च.सू. १. १३४

यादृच्छिकसिद्धौ हि वैद्यो न रोगप्रमोक्षे कारणं, किन्तु घुणाक्षरन्यायेन दैवागतो भेषजस्य सम्यग्योग इति।

–चक्रपाणि

# कपिञ्जलाधिकरण न्याय

चित्रकं पिप्पलीमूलं द्वौ क्षारौ लवणानि च ।

व्योषं हिङ्ग्वजमोदां च चव्यं चैकत्र चूर्णयेत् ॥९६॥

गुटिका मातुलुङ्गस्य दाडिमस्य रसेन वा ।

कृता विपाचयत्यामं दीपयत्याशु चालनम् ॥९७॥

– च.चि.१५

चित्रकेत्यादौ लवणानि चेत्यत्र कपिञ्जलाधिकरणन्यायेन लवणत्रयमिच्छन्ति; किन्त्वनियते स न्यायो भवति, इह तु पञ्चलवणानां प्राधान्येन दीर्घञ्जीवितीये निर्दिष्टत्वात् पञ्चलवणस्य च शक्योपादानत्वात्? पञ्चैव लवणानि ग्राह्याणि ॥९६-९७॥

-चक्र.

# गङ्गायां घोषः न्याय

१) कटूष्णो वातकफहा पिण्डालुः पित्तवर्धनः॥१०५॥

–अ.हृ.सू.६

पिण्डालुः वाराहीकन्दः।

ननु, \"गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः" इति न्यायात्पिण्डालुशब्दस्य मुख्यमर्थं पिण्डालुकं विहाय गौणोऽर्थो वाराहीकन्दः कथं ग्राह्यः ? इति चेन्न। "गङ्गायां घोषः" इत्यादौ मुख्यार्थबाधे गौणार्थग्रहणात्। अत्र च मुख्यार्थस्य बाधः कट्वादिगुणायोगात्।

–आयुर्वेदरसायनम्

पिण्डालुक – गुरु, कफकर – सु.सू.४६

## गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः -

तैलं स्वयोनिवत्तत्र मुख्यं तीक्ष्णं व्यवायि च।                – अ.हृ.सू.५

मुख्यमिति वदता तैलशब्दप्रयोगे तिलतैलं ग्राह्यमिति द्योतयति, \"गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः\" इति न्यायात्।

# गङ्गायां घोषः न्याय

२) वैवर्ण्यं स्फुरणं रौक्ष्यं सुप्तिं चुमुचुमायनम् ।
त्वक्स्थो निस्तोदनं कुर्यात् त्वग्भेदं परिपोटनम् ।।२५।।

–सु.नि.१

त्वक्स्थो रसस्थः समीरणो वैवर्ण्यादि करोति, रसस्य त्वक्स्थानत्वात्;
आधेयस्याधारव्यपदेशो लक्षणया , गङ्गायां घोष इतिवत्।

-न्या.चं.

# गङ्गायां घोषः न्याय

३) त्रिवृतां त्रिफलां दन्तीं नीलिनीं सप्तलां वचाम् ।
कम्पिल्लकं गवाक्षीं च क्षीरिणीमुदकीर्यकाम् ॥९॥
पीलून्यारग्वधं द्राक्षां द्रवन्तीं निचुलानि च ।
पक्वाशयगते दोषे विरेकार्थं प्रयोजयेत् ॥१०॥

–च.सू.२

यदि वा पक्वाशयसमीपगतत्वेन अधःप्रवृत्त्युन्मुखो दोषः पक्वाशयगत इत्युच्यते; यथा- गङ्गायां घोष इति॥९-१०॥

–चक्र.

# कुम्भकारपवनाहितपङ्कलेप न्याय

शीते शीतानिलस्पर्शसंरुद्धो बलिनां बली ।
पक्ता भवति हेमन्ते मात्राद्रव्यगुरुक्षमः ॥९॥

–च.सू.६

वायुर्हि हिमसम्बन्धादेव बहिर्निर्गच्छच्छरीरोष्मणो रोधं कृत्वा कुम्भकारपवनाहितपङ्कलेप इवान्तरस्य वह्नेर्वृद्धिमावहति।

–चक्र.

# काकाक्षिगोलक न्याय

१) यावत्पर्येति हस्ताग्रं दक्षिणं जानुमण्डलम् ।
निमेषोन्मेषकालेन समं मात्रा तु सा स्मृता ॥३३॥ -अ.हृ.सू.२२

दक्षिणं हस्ताग्रं कर्तृ यावत् दक्षिणं जानुमण्डलं पर्येति-परिवर्तते।
दक्षिणशब्दोऽत्र काकाक्षिगोलकन्यायेन द्वयोरपि युज्यते।

-सर्वाङ्गसुन्दरा

२) यकृतोदर – प्लीहोदर

# काकाक्षिगोलक न्याय

३) गोधूम उक्तो मधुरो गुरुश्च बल्यः स्थिरः शुक्ररुचिप्रदश्च ॥४३॥

स्निग्धोऽतिशीतोऽनिलपित्तहन्ता सन्धानकृच्छ्लेष्मकरः सरश्च ।

–सु.सू.४६

स्निग्धोऽतिशीत इत्यतिशब्दः काकाक्षिगोलकवदुभयत्रापि सम्बध्यते।

–डल्हण

# अश्म-शस्त्र न्याय

अश्मनो जन्म लोहस्य तत एव च तीक्ष्णता ।
उपघातोऽपि तेनैव तथा नेत्रस्य तेजसः ॥२१॥

-अ.हृ.सू.२३

अश्मनः-पाषाणात्, शस्त्रस्योत्पत्तिः। तस्मादेव चाश्मनः श्लक्ष्णतादियोगात्तीक्ष्णता। उपघातोऽपि-कुण्ठत्वादिकः, तेनैव-पाषाणेन, न केवलं तैक्ष्ण्यम्।

तथा-तेनैवाश्मशस्त्रन्यायेन, नेत्रस्य तेजसः-अग्नेरश्मस्थानीयाज्जन्म।

-सर्वाङ्गसुन्दरा

# पिष्टपेषण न्याय

ततः पक्वेषु दोषेषु लङ्घनाद्यैः प्रशस्यते ।

कषायो दोषशेषस्य पाचनः शमनोऽथवा ॥३९॥ अ.हृ.चि.३

कस्य पाचनः ? इत्याह-दोषशेषस्य।

अत एव पक्वेषु दोषेषु लङ्घनाद्यैरित्यल्पपक्वेषु पक्वप्रायेष्वीषदामेषु दोषेष्विति बोध्यम्।

अन्यथा पक्वस्य पाचनमयुक्तमिव स्यात्, पिष्टपेषणन्यायेनानर्थकत्वात्।

–सर्वाङ्गसुन्दरा

# घृतदग्ध न्याय

वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः॥६॥ -अ.हृ.सू.१

१) येऽपि रक्तजा विकारा विसर्पादयस्तेष्वपि घृतदग्धन्यायेन व्यपदेशो बोध्यः। यथा घृतस्यान्तर्हितेनाग्निना दग्धो घृतदग्ध इत्युच्यते, तद्वद्रक्तस्थैर्वातादिभिर्दोषैर्जातो रक्तजोऽयमित्युच्यते।

-सर्वाङ्गसुन्दरा

# घृतदग्ध न्याय

२) दोषदूषितेष्वत्यर्थं धातुषु सञ्ज्ञा- रसजोऽयं, शोणितजोऽयं, मांसजोऽयं, मेदोजोऽयं, अस्थिजोऽयं मज्जजोऽयं, शुक्रजोऽयं व्याधिरिति ।।८।। सु.सू.२४

दोषैरेव दूषितेषु धातुष्वत्यर्थं दोषजेषु विकारेषु रसजादिसञ्ज्ञा; यथा- घृतदग्धस्तैलदग्धस्ताम्रदग्धो लोहदग्ध इति।

अत्र घृतादिशब्देन घृतादिस्थो वह्निर्लक्ष्यते, एवं रसादिजो व्याधिरित्यत्र रसादिस्थितवातादिदोषा लक्ष्यन्ते।।८।।

–डल्हण

३) रक्तार्श, मांसार्बुद, **etc**

# प्रतिस्रोतो न्याय

रसाद्रक्तं ततो मांसं मांसान्मेदस्ततोऽस्थि च॥६२॥

अस्थ्नो मज्जा ततः शुक्रं शुक्राद्गर्भः प्रजायते। – अ.हृ.शा.३

यतः सर्वे धातव आहाररसेन युगपद्ध्यानविक्षिप्तेन स्वे स्वे स्रोतस्यवतिष्ठमानाः स्वातन्त्र्येणाहाररसाप्यायिताः पुष्यन्ति, अनाप्यायिताः क्षयं यान्ति। तदेवं कथं पूर्वस्य धातोर्वृद्धौ परस्य वृद्धिः पूर्वस्य धातोः क्षये परस्य क्षयः स्यात् ? न हि कदाचिद्घटते मैत्रे तृप्ते चैत्रः सुहितः स्यात्, अतृप्ते वाऽसुहितः स्यात्। तथा स्थूलस्य मेद एवोपचीयत इति दृष्टम्। न च समं कृत्वा सप्तसु धातुस्रोतःसु विनिक्षिप्ते रसे मेदसोऽधिका वृद्धिः कथञ्चिदुपपद्यते। क्रमपरिणामपक्षे तु स्थूलस्याहाररसो रसधातुतया परिणमिति। रसधातू रक्ततया, रक्तधातुर्मांसतया, मांसधातुर्मेदस्तया परिणमति। मेदस आहारपूर्णस्य स आहाररसो मेदस्त्वं प्राप्तः पुनः प्रतिस्रोतोन्यायेन मांसस्य विशेषवतीम् वृद्धिं करोति, अनन्तरं रक्तस्य, अनन्तरं रसस्य। पुनश्च रसधातुरतिपूर्णो रक्तस्य वृद्धिं विधत्ते, रक्तधातुर्मांसस्य, मांसधातुर्मेदसः, इत्येवमतिस्थूलस्य मेदोवद्रसादयो मांसावसाना अप्युपचीयन्ते। अस्थ्यादयश्चास्थ्यादिस्रोतसां मेदसाऽऽवृतत्वान्न तथोपचीयन्ते। तस्मादाहाररसेन मेदोभावेन परिणमता उदकपरिपूर्णाभिनवमृत्कुम्भजललवस्यन्दनन्यायेनास्थ्यादयो धातवः केवलमाप्याय्यन्ते, न तु तथोपचीयन्ते। तथा च मुनिः (च. सू. अ. २१/४)- \"स्थूलस्य मेद एवोपचीयते, न तथेतरे धातवः।\" इति। अस्य ह्ययमर्थः,-मेदसो येऽन्येऽस्थ्यादयः शुक्रावसानस्ते न तथोपचीयन्ते, न पुनः पूर्वे रसादयो धातवः स्थूलस्य नोपचीयन्त इति।

# सिंहावलोकन न्याय

पाठाग्निवत्सकग्रन्थितिक्ताशुण्ठीवचाभयाः॥१०५॥
क्वथिता यदि वा पिष्टाः श्लेष्मातीसारभेषजम्।

–अ.हृ.चि.९

एते पाठादयः क्वथिताः पाचनन्यायेन, चूर्णिता वा श्लेष्मातीसारभेषजमिति।
अत्रापि वक्ष्यमाणं सिंहावलोकनन्यायेन\" कोष्णवारिणा इत्येतत्सम्बध्यते।

–सर्वाङ्गसुन्दरा

# उत्सर्ग–अपवाद न्याय

कफज रोग – स्वेदन **Indicated**
कफज तिमिर – **Contraindicated**

उदर – स्वेदन **Contraindicated**
कफज उदर – स्वेदन **Indicated**

गुल्म – वमन **Contraindicated**

वातगुल्मे कफो वृद्धो हत्वाऽग्निमरुचिं यदि ।
हृल्लासं गौरवं तन्द्रां जनयेदुल्लिखेत्तु तम् ॥२१॥

# एकतण्डुलाहारिणाम्-अनशन न्याय

१) स्वाभाविकास्तु क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः ।।२५।।

-सु.सू.१

यद्यपि क्षुत्पिपासाजरासु स्वभावसम्भूतास्वपि पित्तजत्वं निद्रायां श्लेष्मतमोभवत्वमस्ति;

तथाऽप्यल्पदोषारब्धत्वाददोषजत्वमुच्यते, एकतण्डुलाहारिणामनशनव्यपदेशवत्।

-ड.

- काकतालीय न्याय ~ घुणाक्षर न्याय
- दीर्घ शष्कुली भक्षण न्याय ~ युगपत् उत्पलशतपत्रभेदन्याय
- पिष्टपेषणन्याय ~ काकदन्त परीक्षा न्याय

अनर्थकत्व निष्प्रयोजनत्व

# THANK YOU !!!